# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – केशवीयजातकपद्धतिः, षट्पञ्चाशिका | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां होराविदां प्रीतये ।
यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेद्योऽथ खेटाः स्फुटाः
यत्पक्षे हि घटन्त उदगम् इहास्तर्क्षं सषड्भः स च ॥

२ रात्रेः शेषमितं युतं दिनदलेनाह्नो गतं शेषकं
विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिंशच्चुतं चोन्नतम् ।
यत्पूर्वान्नतषड्भयुक्तरवितः पश्चान्नतादित्यतो
यल्लङ्कोदयकैश्च लग्नमिव तन्माध्यं सषड्भं सुखम् ॥

३ खेकाग्निद्विखवेदरामयमभूखाभ्राभ्रमेकादिभे
द्रष्टावर्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः ।
मन्देनाङ्कयमेऽसृजा नगगुणेऽङ्का भादिजाः संस्कृता
भागघ्नक्षयवृद्धिखानललवेनाब्ध्युद्धृता दृग् भवेत् ॥

**प्रश्नः २ द्वादशभावसाधनविषये सोदाहरणं लिखत ।**

**प्रश्नः ३ ग्रहमैत्रीचक्रविषये विषदचर्चां कुरुत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ यद्द्रव्यं खपरस्य भावगृहदृग्योगादिसर्वं फलं
योज्यं वृत्तिकृतिर्बलादिह दशायां चाथ यो वैरयुक् ।
पापः पापदशां विशेत्स च विपत्कर्ताऽथ तद्भङ्गद-
स्तत्काले बलवान् खगः शुभसुहृद्दृष्टेष्टषड्वर्गगः ॥

२ अर्धस्यैकभगस्त्रिकोणगृहगस्त्र्यंशस्य चास्ते नगां-
शस्यांघ्रेश्चतुरस्त्रगौ निजगुणैः पत्कैकभे स्याद्बली ।
अंशादौ कुरु रूपमन्नसमतां कृत्वा च नाशं छिदा-
मंशघ्ना स्वदशाः पृथक् खलु लवैक्याप्ताः स्युरन्तर्दशा ॥

३ स्याल्लिप्ताः खनखोद्धृताविभतनोर्वर्षादिपैण्डत्रिके
लग्नायुर्निखिलैस्तदंशकसमं कैश्चिद्भतुल्यं स्मृतम् ।
यस्येशोऽधिबलस्तदेव हि परैस्तेनाढ्यमन्यैर्यदं
शायुर्वत्त्वथ चांशतुल्यमखिलोक्तं ग्राह्यमेवादिमम् ॥

**प्रश्नः ५ चक्रार्द्धहानिविषये विषदचर्चां कुरुत ।**

**प्रश्नः ६ अन्तर्दशाविषये विषदचर्चां कुरुत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ कोणस्थितः पूर्णतनु शशाङ्को जीवेन दृष्टो यदि वा सितेन ।
क्षिप्रप्रणष्टस्य करोति लब्धिं लाभोपयातो बलवाञ्छुभश्च ॥

२ वृषसिंहवृश्चिकघटैर्वृद्धिस्थानं गमागमौनस्तः ।
न मृतं न चापि नष्टं न रोगशान्तिर्न चाभिभवः ॥

३ स्थिरे शशी चरोदये न यागमोरिपोर्यदा ।
तदागमं रिपोर्वदेद्विपर्यये विपर्ययम् ॥

**प्रश्नः ८ विवाहज्ञानविषये विषदचर्चां कुरुत ।**

**प्रश्नः ९ जय-पराजयविषये विषदचर्चां कुरुत ।**

**प्रश्नः १० दशानां प्रश्नानामुत्तरं लिखत ।**

१ वृषराशेः लङ्कोदयमानं लिखत ।
२ केन्द्रभावः अर्थात् के भावाः ?
३ स्त्रीकारकग्रहाः के ?
४ सूर्यग्रहस्य उच्चराशिः कः ?
५ स्त्रीराशयः के ?
६ शनिः कस्मिन् भावे बलवान् भवति ?
७ एकस्मिन् राशौ कति अंशाः भवन्ति ?
८ एकस्मिन् अहोरात्रे कति घट्यः भवन्ति ?
९ नृयुग्मः इति कस्य राशेः अपरं नाम ?
१० शुभाशुभग्रहाणां नामानि लिखत ।
११ मृत्युः इति कस्य भावस्य संज्ञा ?
१२ भौमग्रहस्य नीचराशिः कः ?
१३ षड्पञ्चाशिकाग्रन्थस्य रचनाकारः कः ?
१४ मातृस्थानम् अर्थात् कः भावः ?
१५ केशवीयजातकपद्धतिः इति ग्रन्थस्य ग्रन्थकारः कः ?

****